# परिशिष्टम्

## मम माता देवता

मम माता देवता।
मम माता देवता ॥

अतिसरला, मयि मृदुला,
गृहकुशला, सा अतुला ॥
॥ मम माता ॥

पाययति दुग्धं, भोजयति भक्तं
लालयति नित्यं, तोषयति चित्तम् ॥
॥ मम माता ॥

सायङ्काले नीराजयति
पाठयति च मां शुभङ्करोति
श्लोकं ॥ शुभं करोतु कल्याणम्
आरोग्यं सुखसम्पदम् ।
शत्रुबुद्धिविनाशाय
दीपज्योतिर्नमोऽस्तु ते ॥
पाठयति च मां शुभङ्करोति ॥
॥ मम माता ॥

रात्रौ अङ्के मां स्वापयति
मधु मधु मधुरं गीतं गायति
आ आ आ आ आऽऽ
॥ मम माता ॥

# १. नैव क्लिष्टा न च कठिना

सुरससुबोधा विश्वमनोज्ञा
ललिता हृद्या रमणीया।
अमृतवाणी संस्कृतभाषा
नैव क्लिष्टा न च कठिना ॥ ॥ नैव क्लिष्टा ॥

कविकोकिल-वाल्मीकि-विरचिता
रामायणरमणीयकथा।
अतीव-सरला मधुरमञ्जुला
नैव क्लिष्टा न च कठिना ॥ ॥ सुरस...... ॥

व्यासविरचिता गणेशलिखिता
महाभारते पुण्यकथा।
कौरव-पाण्डव-सङ्गरमथिता
नैव क्लिष्टा न च कठिना ॥ ॥ सुरस...... ॥

कुरुक्षेत्र-समराङ्गण-गीता
विश्ववन्दिता भगवद्गीता।
अमृतमधुरा कर्मदीपिका
नैव क्लिष्टा न च कठिना ॥ ॥ सुरस...... ॥

कविकुलगुरु-नव-रसोन्मेषजा
ऋतु-रघु-कुमार-कविता।
विक्रम-शाकुन्तल-मालविका
नैव क्लिष्टा न च कठिना ॥ ॥ सुरस...... ॥

# २. सुन्दरसुरभाषा

मुनिवरविकसित-कविवरविलसित-
मञ्जुलमञ्जूषा, सुन्दरसुरभाषा।
अयि मातस्तव पोषणक्षमता
मम वचनातीता, सुन्दरसुरभाषा ॥ ॥ मुनिवर.......॥

वेदव्यास-वाल्मीकि-मुनीनाम्
कालिदास-बाणादिकवीनाम्।
पौराणिक-सामान्य-जनानाम्
जीवनस्य आशा, सुन्दरसुरभाषा। ॥ मुनिवर.......॥

श्रुतिसुखनिनदे सकलप्रमोदे
स्मृतिहितवरदे सरसविनोदे।
गति-मति-प्रेरक-काव्यविशारदे
तव संस्कृतिरेषा, सुन्दरसुरभाषा॥ ॥ मुनिवर.......॥

नवरस-रुचिरालङ्कृति-धारा
वेदविषय-वेदान्त-विचारा।
वैद्य-व्योम-शास्त्रादि-विहारा
विजयते धरायां, सुन्दरसुरभाषा॥ ॥ मुनिवर.......॥

# ३. दिव्यामेनां दैवीवाणीम्

दिव्यामेनां दैवीवाणीं, वयं वदामः। क्षणे-क्षणे।
भाषाजननीं जनकल्याणीं, वयं वदामः। क्षणे-क्षणे। ।। दिव्यामेनां ।।

एकीभूयाऽखिले समाजे, बन्धुत्वं रचयामः,
भेदं-द्वन्द्वं तथा विहाय, आनन्दं जनयामः,
आपदि-हर्षे-चाभ्युत्कर्षे, वयं हसामः। क्षणे-क्षणे। ।। दिव्यामेनां ।।

वीराधीराः स्वयंसैनिकाः, संस्कृति-सेवालग्नाः,
निजसौख्ये नहि राष्ट्रसेवने, सिद्धाः सदानिमग्नाः,
हानिं, लाभं, जयाजयम्वा! अभिनन्दामः क्षणे-क्षणे। ।। दिव्यामेनां ।।

गता तमिस्त्रा गतं दुर्दिनमुत्तिष्ठत जाग्रतरे,
पाषाणेऽपि नवमितिहासं, निश्चयेन लिखतरे,
जने-जनेऽपि मैत्री भावं, तत्पश्यामः क्षणे-क्षणे। ।। दिव्यामेनां ।।

न जातिर्नकुलं नो वर्णः, नच गोत्रं नच गौरः कृष्णः,
न धनिकश्चाथवा निर्धनो, नवा सुखी नासक्त विवर्णः,
केवलमेकं मानवधर्मं, चानुभवामः क्षणे-क्षणे। ।। दिव्यामेनां ।।

# ४. मृदपि च चन्दनम्

मृदपि च चन्दनमस्मिन् देशे ग्रामो ग्रामः सिद्धवनम्।
यत्र च बाला देवीस्वरूपा बालाः सर्वे श्रीरामाः।।
हरिमन्दिरमिदमखिलशरीरम्
धनशक्ती जनसेवायै
यत्र च क्रीडायै वनराजः
धेनुर्माता परमशिवा।।

नित्यं प्रातः शिवगुणगानं
दीपनुतिः खलु शत्रुपरा।। ।। मृदपि ।।

भाग्यविधायि निजार्जितकर्म
यत्र श्रमः श्रियमर्जयति।
त्यागधनानां तपोनिधीनां
गाथां गायति कविवाणी

गङ्गाजलमिव नित्यनिर्मलं
ज्ञानं शंसति यतिवाणी।। ।। मृदपि ।।

यत्र हि नैव स्वदेहविमोहः
युद्धरतानां वीराणाम्।
यत्र हि कृषकः कार्यरतः सन्
पश्यति जीवनसाफल्यम्

जीवनलक्ष्यं न हि धनपदवी
यत्र च परशिवपदसेवा।। ।। मृदपि ।।

## शब्दरूपाणि

### अकारान्तः पुल्लिङ्गः ''बालक'' शब्दः

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | बालकः | बालकौ | बालकाः |
| द्वितीया | बालकम् | बालकौ | बालकान् |
| तृतीया | बालकेन | बालकाभ्याम् | बालकैः |
| चतुर्थी | बालकाय | बालकाभ्याम् | बालकेभ्यः |
| पञ्चमी | बालकात् | बालकाभ्याम् | बालकेभ्यः |
| षष्ठी | बालकस्य | बालकयोः | बालकानाम् |
| सप्तमी | बालके | बालकयोः | बालकेषु |
| सम्बोधनम् | हे बालक! | हे बालकौ! | हे बालकाः! |

एवमेव देवः, नरः, वृक्षः, ग्रामः, दीपः, गजः, इत्यादयः।

### आकारान्तः स्त्रीलिङ्गः ''लता'' शब्दः

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | लता | लते | लताः |
| द्वितीया | लताम् | लते | लताः |
| तृतीया | लतया | लताभ्याम् | लताभिः |
| चतुर्थी | लतायै | लताभ्याम् | लताभ्यः |
| पञ्चमी | लतायाः | लताभ्याम् | लताभ्यः |
| षष्ठी | लतायाः | लतयोः | लतानाम् |
| सप्तमी | लतायाम् | लतयोः | लतासु |
| सम्बोधनम् | हे लते! | हे लते! | हे लताः! |

एवमेव माला, शाला, रमा, मापिका, सीता, स्थालिका इत्यादयः।

## ईकारान्तः स्त्रीलिङ्गः ''नदी'' शब्दः

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | नदी | नद्यौ | नद्यः |
| द्वितीया | नदीम् | नद्यौ | नदीः |
| तृतीया | नद्या | नदीभ्याम् | नदीभिः |
| चतुर्थी | नद्यै | नदीभ्याम् | नदीभ्यः |
| पञ्चमी | नद्याः | नदीभ्याम् | नदीभ्यः |
| षष्ठी | नद्याः | नद्योः | नदीनाम् |
| सप्तमी | नद्याम् | नद्योः | नदीषु |
| सम्बोधनम् | हे नदि! | हे नद्यौ! | हे नद्यः! |

एवमेव लेखनी, नगरी, भगिनी, अङ्गुली घटी, अङ्कनी इत्यादयः।

## अकारान्तः नपुंसकलिङ्गः ''फल'' शब्दः

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | फलम् | फले | फलानि |
| द्वितीया | फलम् | फले | फलानि |
| तृतीया | फलेन | फलाभ्याम् | फलैः |
| चतुर्थी | फलाय | फलाभ्याम् | फलेभ्यः |
| पञ्चमी | फलात् | फलाभ्याम् | फलेभ्यः |
| षष्ठी | फलस्य | फलयोः | फलानाम् |
| सप्तमी | फले | फलयोः | फलेषु |
| सम्बोधनम् | हे फल! | हे फले! | हे फलानि! |

एवमेव ज्ञानम्, गृहम्, वनम्, पुष्पम्, चित्रम्, पुस्तकम्, इत्यादयः।

## इकारान्तः पुल्लिङ्गः ''मुनि'' शब्दः

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | मुनिः | मुनी | मुनयः |
| द्वितीया | मुनिम् | मुनी | मुनीन् |
| तृतीया | मुनिना | मुनिभ्याम् | मुनिभिः |
| चतुर्थी | मुनये | मुनिभ्याम् | मुनिभ्यः |
| पञ्चमी | मुनेः | मुनिभ्याम् | मुनिभ्यः |
| षष्ठी | मुनेः | मुन्योः | मुनीनाम् |
| सप्तमी | मुनौ | मुन्योः | मुनिषु |
| सम्बोधनम् | हे मुने! | हे मुनी! | हे मुनयः! |

एवमेव कविः, रविः, पतिः, हरिः इत्यादयः।

## उकारान्तः पुल्लिङ्गः ''गुरु'' शब्दः

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | गुरुः | गुरू | गुरवः |
| द्वितीया | गुरुम् | गुरू | गुरून् |
| तृतीया | गुरुणा | गुरुभ्याम् | गुरुभिः |
| चतुर्थी | गुरवे | गुरुभ्याम् | गुरुभ्यः |
| पञ्चमी | गुरोः | गुरुभ्याम् | गुरुभ्यः |
| षष्ठी | गुरोः | गुर्वोः | गुरूणाम् |
| सप्तमी | गुरौ | गुर्वोः | गुरुषु |
| सम्बोधनम् | हे गुरो! | हे गुरू! | हे गुरवः! |

एवमेव भानुः, तरुः, इत्यादयः।

# सर्वनामशब्दरूपाणि

## दकारान्तः पुल्लिङ्गः ''तद्'' शब्दः

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | सः | तौ | ते |
| द्वितीया | तम् | तौ | तान् |
| तृतीया | तेन | ताभ्याम् | तैः |
| चतुर्थी | तस्मै | ताभ्याम् | तेभ्यः |
| पञ्चमी | तस्मात् | ताभ्याम् | तेभ्यः |
| षष्ठी | तस्य | तयोः | तेषाम् |
| सप्तमी | तस्मिन् | तयोः | तेषु |

## दकारान्तः स्त्रीलिङ्गः ''तद्'' शब्दः

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | सा | ते | ताः |
| द्वितीया | ताम् | ते | ताः |
| तृतीया | तया | ताभ्याम् | ताभिः |
| चतुर्थी | तस्यै | ताभ्याम् | ताभ्यः |
| पञ्चमी | तस्याः | ताभ्याम् | ताभ्यः |
| षष्ठी | तस्याः | तयोः | तासाम् |
| सप्तमी | तस्याम् | तयोः | तासु |

## दकारान्तः नपुंसकलिङ्गः ''तद्'' शब्दः

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | तत् | ते | तानि |
| द्वितीया | तत् | ते | तानि |

तृतीयातः सप्तमीपर्यन्तं पुल्लिङ्गवद् रूपाणि भवन्ति।

## मकारान्तः पुल्लिङ्गः ''किम्'' शब्दः

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | कः | कौ | के |
| द्वितीया | कम् | कौ | कान् |
| तृतीया | केन | काभ्याम् | कैः |
| चतुर्थी | कस्मै | काभ्याम् | केभ्यः |
| पञ्चमी | कस्मात् | काभ्याम् | केभ्यः |
| षष्ठी | कस्य | कयोः | केषाम् |
| सप्तमी | कस्मिन् | कयोः | केषु |

## मकारान्तः स्त्रीलिङ्गः ''किम्'' शब्दः

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | का | के | काः |
| द्वितीया | काम् | के | काः |
| तृतीया | कया | काभ्याम् | काभिः |
| चतुर्थी | कस्यै | काभ्याम् | काभ्यः |
| पञ्चमी | कस्याः | काभ्याम् | काभ्यः |
| षष्ठी | कस्याः | कयोः | कासाम् |
| सप्तमी | कस्याम् | कयोः | कासु |

## मकारान्तः नपुंसकलिङ्गः ''किम्'' शब्दः

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | किम् | के | कानि |
| द्वितीया | किम् | के | कानि |

तृतीयातः सप्तमीपर्यन्तं पुल्लिङ्गवद् रूपाणि भवन्ति।

### दकारान्तः त्रिलिङ्गकः ''अस्मद्'' शब्दः

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | अहम् | आवाम् | वयम् |
| द्वितीया | माम्, मा | आवाम्, नौ | अस्मान्, नः |
| तृतीया | मया | आवाभ्याम् | अस्माभिः |
| चतुर्थी | मह्यम्, मे | आवाभ्याम्, नौ | अस्मभ्यम्, नः |
| पञ्चमी | मत् | आवाभ्याम् | अस्मत् |
| षष्ठी | मम, मे | आवयोः, नौ | अस्माकम्, नः |
| सप्तमी | मयि | आवयोः | अस्मासु |

### दकारान्तः त्रिलिङ्गकः ''युष्मद्'' शब्दः

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | त्वम् | युवाम् | यूयम् |
| द्वितीया | त्वाम्, त्वा | युवाम्, वाम् | युष्मान्, वः |
| तृतीया | त्वया | युवाभ्याम् | युष्माभिः |
| चतुर्थी | तुभ्यम्, ते | युवाभ्याम्, वाम् | युष्मभ्यम्, वः |
| पञ्चमी | त्वत् | युवाभ्याम् | युष्मत् |
| षष्ठी | तव, ते | युवयोः, वाम् | युष्माकम्, वः |
| सप्तमी | त्वयि | युवयोः | युष्मासु |

## धातुरूपाणि

### पठ् धातुः ''लट्लकारः'' (वर्तमानकाले)

| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | पठति | पठतः | पठन्ति |
| मध्यमपुरुषः | पठसि | पठथः | पठथ |
| उत्तमपुरुषः | पठामि | पठावः | पठामः |

## पठ् धातुः ''लङ्लकारः'' (भूतकाले)

| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | अपठत् | अपठताम् | अपठन् |
| मध्यमपुरुषः | अपठः | अपठतम् | अपठत |
| उत्तमपुरुषः | अपठम् | अपठाव | अपठाम |

## पठ् धातुः ''लृट्लकारः'' (भविष्यत्काले)

| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | पठिष्यति | पठिष्यतः | पठिष्यन्ति |
| मध्यमपुरुषः | पठिष्यसि | पठिष्यथः | पठिष्यथ |
| उत्तमपुरुषः | पठिष्यामि | पठिष्यावः | पठिष्यामः |

एवमेव वद्, लिख्, गम् (गच्छ्), क्रीड्, पा (पिब्) इत्यादयः

## 'कृ' धातुः ''लट्लकारः''

| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | करोति | कुरुतः | कुर्वन्ति |
| मध्यमपुरुषः | करोषि | कुरुथः | कुरुथ |
| उत्तमपुरुषः | करोमि | कुर्वः | कुर्मः |

## 'अस्' धातुः ''लट्लकारः''

| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | अस्ति | स्तः | सन्ति |
| मध्यमपुरुषः | असि | स्थः | स्थ |
| उत्तमपुरुषः | अस्मि | स्वः | स्मः |

## 'दा' धातुः ''लट्लकारः''

| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | ददाति | दत्तः | ददति |
| मध्यमपुरुषः | ददासि | दत्थः | दत्थ |
| उत्तमपुरुषः | ददामि | दद्वः | दद्मः |

## सन्धिपरिचयः

वर्णयोः वर्णानां वा मेलनं सन्धिः। स्वरवर्णमेलनं स्वरसन्धिः। सन्धेः त्रयः प्रकाराः सन्ति। स्वरसन्धिः, व्यञ्जनसन्धिः विसर्गसन्धिः च। स्वरसन्धेः बहवः प्रकाराः सन्ति। किन्तु अत्र केवलं दीर्घसन्धिं पठामः।

दीर्घसन्धिः – यदि अ, आ, इ, ई, उ, ऊ वर्णानां समक्षं समानाः स्वराः स्युः तदा द्वयोः स्थाने दीर्घः स्वरः भवति। यथा–

| | | | | |
|---|---|---|---|---|
| हिमाचलः | = | हिम + अचलः | → | अ + अ = आ |
| देहान्तः | = | देह + अन्तः | → | अ + अ = आ |
| हिमालयः | = | हिम + आलयः | → | अ + आ = आ |
| भोजनालयः | = | भोजन + आलयः | → | अ + आ = आ |
| विद्यार्थी | = | विद्या + अर्थी | → | आ + अ = आ |
| शिक्षार्थी | = | शिक्षा + अर्थी | → | आ + अ = आ |
| विद्यालयः | = | विद्या + आलयः | → | आ + आ = आ |
| महाशयः | = | महा + आशयः | → | आ + आ = आ |
| कवीन्द्रः | = | कवि + इन्द्रः | → | इ + इ = ई |
| गिरीशः | = | गिरि + ईशः | → | इ + ई = ई |
| महीन्द्रः | = | मही + इन्द्रः | → | ई + इ = ई |
| नदीशः | = | नदी + ईशः | → | ई + ई = ई |
| भानूदयः | = | भानु + उदयः | → | उ + उ = ऊ |
| भानूष्मा | = | भानु + ऊष्मा | → | उ + ऊ = ऊ |
| वधूत्सवः | = | वधू + उत्सवः | → | ऊ + उ = ऊ |
| वधूर्णावस्त्रम् | = | वधू + ऊर्णावस्त्रम् | → | ऊ + ऊ = ऊ |

## उपसर्गपरिचयः

यः शब्दांशः कस्यापि शब्दस्य धातोः वा पूर्वं प्रयुज्य तस्य अर्थे परिवर्तनं विशेषतां वा आनयति सः उपसर्गः। उपसर्गाः निम्नलिखिताः सन्ति–

प्र, परा, अप, सम्, अनु, अव, निस्, निर्, दुस्, दुर्, वि, आङ्, नि, अधि, अपि, अति, सु, उत्, अभि, प्रति, परि, उप एते उपसर्गाः।

यथा– हृ धातुः (हरणे), कृ धातु (करणे)

| | | |
|---|---|---|
| हरति | = | चुराता है। |
| प्रहरति | = | प्रहार करता है। |
| विहरति | = | घूमता है। |

| | | |
|---|---|---|
| संहरति | = | संहार करता है। |
| करोति | = | करता है। |
| अनुकरोति | = | अनुकरण करता है। |
| प्रतिकरोति | = | प्रतिकार करता है। |
| संस्करोति | = | संस्कार करता है। |

उपसर्गेण धात्वर्थो बलादन्यः प्रतीयते।
प्रहाराहारसंहारविहारपरिहारवत्।।

## प्रत्ययपरिचयः

यः शब्दः धातोः शब्दस्य वा अन्ते प्रयुज्य विशेषार्थस्य विधानं करोति सः प्रत्ययः। प्रत्ययः द्विविधः। कृदन्तप्रत्ययः तद्धितप्रत्ययः च।

कृदन्तप्रत्ययः यः प्रत्ययः धातोः अन्ते प्रयुज्यते सः कृदन्तप्रत्ययः।

यथा– पठ् धातुः क्त्वा प्रत्ययः – पठित्वा।

तद्धितप्रत्ययः यः प्रत्ययः शब्दस्य अन्ते प्रयुज्यते सः तद्धितप्रत्ययः

यथा– भारत शब्दः घ (ईय्) प्रत्ययः— भारतीयः।

अत्र केवलं वयं कृदन्तप्रत्ययं ''क्त्वा'' प्रत्ययं ''तुमुन्'' प्रत्ययं च पठामः।

क्त्वा प्रत्ययः ''कर'' या ''करके'' इत्यर्थे क्त्वाप्रत्ययः भवति। यथा–

| | | | | | | |
|---|---|---|---|---|---|---|
| हस् | + | क्त्वा | = | हसित्वा | = | हँसकर |
| चल् | + | क्त्वा | = | चलित्वा | = | चलकर |
| भू | + | क्त्वा | = | भूत्वा | = | होकर |
| गम् | + | क्त्वा | = | गत्वा | = | जाकर |
| दा | + | क्त्वा | = | दत्वा | = | देकर |
| पा | + | क्त्वा | = | पीत्वा | = | पीकर |

तुमुन् प्रत्ययः ''के लिए'' इत्र्थे तुमुन् प्रत्ययः भवति। यथा–

| | | | | | | |
|---|---|---|---|---|---|---|
| पठ् | + | तुमुन् | = | पठितुम् | = | पढ़ने के लिए |
| हस् | + | तुमुन् | = | हसितुम् | = | हसने के लिए |
| दा | + | तुमुन् | = | दातुम् | = | देने के लिए |
| पा | + | तुमुन् | = | पातुम् | = | पीने के लिए |
| गम् | + | तुमुन् | = | गन्तुम् | = | जाने के लिए |

## अव्ययपरिचयः

यत् त्रिषु लिङ्गेषु, सर्वेषु वचनेषु सर्वासु विभक्तिषु च समानं भवति, तद् अव्ययं कथ्यते–

| अव्ययम् | | अर्थः |
|---|---|---|
| यत्र | – | जहाँ |
| तत्र | – | वहाँ |
| कुत्र | – | कहाँ |
| सर्वत्र | – | सब जगह |
| यदा | – | जब |
| तदा | – | तब |
| सर्वदा | – | हमेशा |

सदृशं त्रिषु लिङ्गेषु सर्वासु च विभक्तिषु।
वचनेषु च सर्वेषु यन्नव्येति तदव्ययम्।।

## विभक्तिपरिचयः

| विभक्तिः | कारकम् | चिह्नम् |
|---|---|---|
| प्रथमा | कर्त्ता | ने |
| द्वितीया | कर्म | को |
| तृतीया | करणम् | से, द्वारा |
| चतुर्थी | सम्प्रदानम् | के लिए |
| पञ्चमी | अपादानम् | से (अलग होने में) |
| षष्ठी | – | का, की, के, रा, री, रे |
| सप्तमी | अधिकरणम् | में पर |
| सम्बोधनम् | – | हे, भो, रे |

# व्यावहारिकसंस्कृतशब्दावलिः

## फलानि

| | | |
|---|---|---|
| आम्रम् | = | आम |
| सेवम् | = | सेव |
| कदली | = | केला |
| जम्बुः | = | जामुन |
| दाडिमम् | = | अनार |
| बिल्वम् | = | बेल फल |
| कपित्थम् | = | कैथ का फल |
| द्राक्षा | = | अङ्गूर |
| बदरी | = | बेर |

## शाकानि

| | | |
|---|---|---|
| आलुकम् | = | आलू |
| रक्ताङ्गः | = | टमाटर |
| कूष्माण्डः | = | कद्दू |
| मूलकम् | = | मूली |
| गृञ्जनम् | = | गाजर |
| भिण्डकः | = | भिण्डी |
| पालकी | = | पालक |
| वृन्ताकम् | = | भटा (बैंगन) |
| कारवेल्लः | = | करेला |
| मरीचिका | = | मिर्ची |
| अलाबुः | = | लौकी |

## पाठ्यवस्तूनि

| | | |
|---|---|---|
| पुस्तकम् | = | पुस्तक |
| लेखनी | = | कलम |
| उत्तरपुस्तिका | = | कॉपी |
| कर्गदम् | = | कागज |
| मशी | = | स्याही |

## भोज्यपदार्थाः

| | | |
|---|---|---|
| रोटिका | = | रोटी |
| प्ररोटिका | = | पराँठा |
| पूरिका | = | पूरी |
| शाकम् | = | सब्जी |
| सूपः | = | दाल (पकी हुई) |
| ओदनम् | = | भात |
| अवलेहः | = | अचार, चटनी |
| शष्कुली | = | कचौड़ी, पूरी |
| संयावकः | = | हलवा |
| सुपिष्टकम् | = | बिस्किट |
| चाकलेहः | = | चॉकलेट (टॉफी) |
| दुग्धम् | = | दूध |
| लवणम् | = | नमक |
| रसगोलकम् | = | रसगुल्ला |
| मिष्टान्नम् | = | मिठाई |
| दधि | = | दही |

## पुष्पाणि

| | | |
|---|---|---|
| कमलम् | = | कमल |
| पाटलम् | = | गुलाब |
| कन्दुकः | = | गेंदा |
| चम्पकः | = | चम्पा |
| मालती | = | चमेली |
| मल्लिका | = | बेला |
| यूथिका | = | जूही |

## दैनिकोपयोगीनि वस्तूनि

| | | |
|---|---|---|
| स्नानफेनकम् | = | नहाने का साबुन |
| वस्त्रफेनकम् | = | कपड़े धोने का साबुन |
| दन्तफेनकम् | = | टूथपेस्ट |
| क्षालनचूर्णम् | = | धोने का पावडर |
| व्यजनम् | = | पङ्खा |
| स्यूत: | = | थैला |
| छत्रम् | = | छाता |
| कर्त्तरी | = | कैंची |
| तालकम् | = | ताला |
| अग्निपेटिका | = | माचिस |
| चुल्लिका | = | चूल्हा |
| वायुचुल्लिका | = | गैस चूल्हा |
| चायम् | = | चाय |
| जलम् | = | जल |
| भोजनम् | = | भोजन |

## परिजननामानि

| | | |
|---|---|---|
| पिता | = | पिता |
| माता | = | माता |
| पितामह: | = | दादा |
| पितामही | = | दादी |
| मातामह: | = | नाना |
| मातामही | = | नानी |
| भ्राता | = | भाई |
| भगिनी | = | बहन |
| अग्रज: | = | बड़ा भाई |
| अनुज: | = | छोटा भाई |
| अग्रजा | = | बड़ी बहन |
| अनुजा | = | छोटी बहन |
| मातुल: | = | मामा |
| मातुलानी | = | मामी |
| पितृव्य: | = | चाचा |
| पितृव्या | = | चाची |

# प्रादर्श–प्रश्नपत्रप्रारूपम्

## विषयः – संस्कृतम्

### कक्षा - षष्ठी

अवधिः – घण्टात्रयम् पूर्णाङ्काः - १००

प्रश्नः - १

(क) एकपदेन उत्तरं लिखत– ५

(क) विद्या किं ददाति?

(ख) के जलं वर्षन्ति?

(ग) मध्यप्रदेशः कुत्र विराजते?

(घ) कस्मिन् मासे स्वतन्त्रादिवसः भवति?

(ङ) सिक्खधर्मस्य प्रवर्तकः कः?

(ख) केषाञ्चन पञ्चप्रश्नानाम् उत्तराणि एकवाक्येन लिखत– १०

(क) सर्वेभ्यः सुकरं जीवनं कदा भवति?

(ख) मध्यप्रदेशस्य कस्मिन् मण्डले हीरकरत्नं प्राप्यते?

(ग) अयोध्यानगरी कस्मिन् प्रदेशे अस्ति?

(घ) कः उच्चैः गर्जति?

(ङ) कस्य यन्त्रस्य गतिः वायुयानात् द्रुततरा भवति?

(च) सप्तविभक्तीनां नामानि क्रमशः लिखत।

(छ) रज्जुनिर्माणं कथं भवति?

(स) कोष्ठकात् उचितानि पदानि चित्वा रेखाङ्कितपदानाम् आधारेण प्रश्ननिर्माणं कुरुत– ५

(केभ्यः, का, के, काभ्याम्, कुत्र)

(क) सूर्यः <u>आकाशे</u> तपति।

(ख) <u>सर्वे</u> समवेतस्वरेण राष्ट्रगानं गास्यन्ति।

(ग) माता <u>सर्वेभ्यः</u> भोजनं पचति।

(घ) दीपावल्यां <u>लक्ष्मीः</u> पूज्यते।

(ङ) वयं <u>नेत्राभ्यां</u> पश्यामः।

प्रश्नः - २ १०

(क) गद्यांशं पठित्वा प्रश्नानाम् उत्तराणि लिखत–

दशरथस्य आज्ञया रामः राज्यं त्यक्त्वा वनम् अगच्छत्। पत्नी सीता, अनुजः लक्ष्मणः च तेन सह अगच्छताम्। ते ऋषिभिः सह वने अवसन्। तत्र राक्षसराजः रावणः सीतां कपटेन अहरत्। सीतान्वेषणाय रामलक्ष्मणौ वने अभ्रमताम्। तौ वालेः राज्यं किष्किन्धाम् अगच्छताम्। राजा सुग्रीवः तयोः मित्रम् अभवत्।

(१) कस्य आज्ञया रामः वनम् अगच्छत्?

(२) रामस्य पत्नी का?

(३) लक्ष्मणः केन सह वनम् अगच्छत्?

(४) ऋषिभिः सह के अवसन्?

(५) सुग्रीवः कयोः मित्रम्?

अथवा

परेषाम् उपकारः परोपकारः। सूर्यः लोकहिताय तपति। नद्यः परोपकाराय वहन्ति। वृक्षाः परोपकाराय फलानि यच्छन्ति। मेघाः परोपकाराय जलं वर्षन्ति। वसुधा परोपकाराय भारं वहति। एवं प्रकृतिः परोपकाराय प्रेरयति।

(१) परोपकारः कः?

(२) मेघाः किं कुर्वन्ति?

(३) वृक्षाः कानि यच्छन्ति?

(४) नद्यः किं कुर्वन्ति?

(५) प्रकृतिः कस्मै प्रेरयति?

(ख) पद्यं पठित्वा प्रश्नानाम् उत्तराणि लिखत– १०

विदेशेषु धनं विद्या, व्यसनेषु धनं मतिः।
परलोके धनं धर्मः शीलं सर्वत्र वै धनम्।।

(१) धर्मः कुत्र धनम्?

(२) विदेशेषु धनं किम्?

(३) शीलं कुत्र धनम्?

(४) 'विदेशः' इति शब्दस्य विलोम शब्दं लिखत।

(५) धर्मः कुत्र धनम्?

अथवा

काव्यशास्त्रविनोदेन कालो गच्छति धीमताम्।
व्यसनेन तु मूर्खाणां निद्रया कलहेन वा।।

(१) कस्य समय: निद्रया गच्छति?

(२) धीमतां काल: कथं गच्छति?

(३) व्यसनेन कस्य समय: गच्छति?

(४) काव्यशास्त्रविनोदं कस्य कार्यम्?

(५) मूर्खाणां व्यसनम् किं किम्?

प्रश्न: - ३

(क) पाठ्यपुस्तकस्य एकं श्लोकं लिखत य: प्रश्नपत्रे नास्ति। ५

(ख) उचितपदै: रिक्तस्थानानि पूरयत– ५

(प्रज्ञा, लोचनाभ्याम्, करिष्यति, तस्य, दर्पण:)

यस्य स्वयं ................ नास्ति, ................ शास्त्रं किं करोति?

................ विहीनस्य ................ किम् ................ ?

प्रश्न: - ४

(क) उचितशब्दरूपै: रिक्तस्थानानि पूरयत– २

| | शब्द: | विभक्ति: | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|---|---|
| (१) | शाला | षष्ठी | शालाया: | .......... | ........... |
| (२) | उद्यानम् | प्रथमा | ........... | ........... | उद्यानानि |

(ख) उचितधातुरूपै: रिक्तस्थानानि पूरयत– २

| धातु: | लकार: | पुरुष: | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|---|---|
| भू (भव्) | लृट् | प्रथमपुरुष: | ......... | भविष्यत: | भविष्यन्ति |
| पठ् | लङ् | मध्यमपुरुष: | अपठ: | ......... | ......... |

(ग) अधोलिखितपदानां मूलशब्दं लिङ्गं विभक्तिं वचनं च लिखत– २

| पदम् | मूलशब्द: | लिङ्गम् | विभक्ति: | वचनम् |
|---|---|---|---|---|
| बालिकायै | ........... | ........... | .......... | ....... |
| प्रदेशस्य | ........... | ........... | ........... | ....... |

(घ) अधोलिखितक्रियापदानां धातुं लकारं पुरुषं वचनं च लिखत– २

| क्रियापदम् | धातुः | लकारः | पुरुषः | वचनम् |
|---|---|---|---|---|
| भवति | ........... | ........... | ........... | ....... |
| अगच्छत् | ........... | ........... | ........... | ....... |

प्रश्नः - ५

(क) सन्धिम् अथवा सन्धि-विच्छेदं कुरुत– २

| | | | | |
|---|---|---|---|---|
| धन्वन्तरिः | + | इति | = | ..................। |
| अयोध्या | + | आगमनम् | = | ..................। |
| दीप | + | आवलिः | = | ..................। |
| विद्या | + | ..........= | | विद्यालयः। |

(ख) प्रत्ययं उपसर्गं वा योजयित्वा उचितपदनिर्माणं कुरुत– २

| | | | | |
|---|---|---|---|---|
| ज्ञा | + | क्त्वा | = | ................। |
| पठ् | + | तुमुन् | = | ..................। |
| भू | + | क्त्वा | = | ..................। |
| ...... | + | ...... | = | कूर्दित्वा। |

(ग) अधोलिखितवाक्येषु उचितं अव्ययं योजयत– २

(यत्र-तत्र, कुत्र, सर्वत्र, कदा)

(१) त्वं ................ गच्छसि।

(२) नरेन्द्रः ................ विद्यालयं गच्छति।

(३) ................ शर्करा अस्ति ................ पिपीलिकाः सन्ति।

(४) ईश्वरः ................ अस्ति।

(घ) रिक्तस्थानानि पूरयत– २

(१) ५.०० ................।

(२) ................ सार्धचतुर्वादनम्।

(ङ) शब्दैः सङ्ख्याः लिखत– २

३, ५, ७, ८

(च) प्र, परा उपसर्गस्य सहाय्येन शब्दनिर्माणं कुरुत। २

प्रश्नः - ६

अधोलिखितपदैः पत्रं पूरयत– ६

(कुशली, नमस्कारः, भ्रमणार्थम्, चलिष्यसि, प्रखरः)

प्रिय मित्र, नरसिंहपुरम्

राहुल ...................... २५ अगस्त मासः २००६

अहम् अत्र ................. अस्मि। आगामीमासे विद्यालयस्य छात्राः ................. गमिष्यन्ति। अहम् अपि गमिष्यामि। यदि त्वम् अपि भ्रमणार्थं ................. तर्हि शीघ्रम् आगच्छ।

तव मित्रम्

.........

प्रश्नः - ७ चित्रं दृष्ट्वा कोष्ठकस्यशब्दानां साहाय्येन पञ्चवाक्यानि लिखत– ५

(उद्यानम्, भ्रमणम्, क्रीडा, कुर्वन्ति, वृक्षः)



प्रश्नः - ८ पञ्चवाक्येषु स्वदिनचर्यां लिखत। ५

प्रश्नः - ९ अधोलिखितवाक्यानि उचितक्रमेण लिखत– २

(क) बुधवासरे गोवर्धनपूजा आसीत्।

(ख) मङ्गलवासरे दीपवलिः आसीत्।

(ग) सोमवासरे नरकचतुर्दशी आसीत्।

(घ) रविवासरे धनत्रयोदशी आसीत्।

प्रश्नः - १०

(क) शब्दार्थ-मेलनं कुरुत– २

| | (अ) | (ब) |
|---|---|---|
| (१) | कूर्दित्वा | बुद्धिहीनः |
| (२) | मूर्खः | आगामिदिनम् |
| (३) | यन्त्रम् | कूर्दनं कृत्वा |
| (४) | श्वः | उपकरणम् |

(ख) प्रत्येकस्य पदस्य पर्यायद्वयं लिखत– २

| | | | |
|---|---|---|---|
| (१) | सूर्यः | वारि | अम्बु |
| (२) | जलम् | धरा | भूमिः |
| (३) | पृथ्वी | शशीः | इन्दुः |
| (४) | चन्द्रः | भानुः | भास्करः |

(ग) विलोमपदानां मेलनं कुरुत– २

| | (अ) | (ब) |
|---|---|---|
| (१) | नभः | जलम् |
| (२) | अग्निः | दुःखम् |
| (३) | उष्णम् | पातालम् |
| (४) | सुखम् | शीतम् |

(घ) उचितं मेलनं कुरुत– २

| | (अ) | (ब) |
|---|---|---|
| (१) | मधुरम् | चित्राणि |
| (२) | उत्तमाः | जनः |
| (३) | सुन्दराणि | फलम् |
| (४) | दुष्टः | बालकाः |

(ङ) वाक्ये लिखितं रेखाङ्कितंपदं शुद्धं कुरुत– २

(१) त्व विद्यालयः परिचयं कथय।

(२) काशीनाथः आगच्छन्ति।

(३) एषः चषकौ स्तः।

(४) अहं संस्कृतं पठति।

(च) भिन्नप्रकृतियुक्तं पदं पृथक्कुरुत– २

(१) सेवम्, कदली, मरीचिका, आम्रम्।

(२) देवेन, तस्मात्, बालिकायाः आगच्छन्ति।

(३) शीतकम्, घटी, दूरदर्शनम्।

(४) देशः, प्रदेशः, जनपदः, विदेशः।

# आपकी कक्षा में कुछ विकलांग बच्चे हैं उनकी मदद करें :-

1

दृष्टिहीन बच्चे के लिए..... नाम लेकर पुकारें। 'ए' या 'तुम' कहने से वह बोखला जाते हैं। उन्हें स्कूल के गेट से लेकर सभी रास्तों से परिचित करा दें।
कक्षा से शौचालय तक-
प्रधान अध्यापक के कमरे तक-
और खेल के मैदान तक।



2

दूसरा बच्चा सुन नहीं सकता और शायद बोलता भी न हो। उससे जब बात करें, या पढ़ायें, तो उसकी तरफ मुंह करके बोलें। ताकि वह आपके होंठ पढ़ सके और इशारे समझ सके।



3



एक तीसरा बच्चा भी है जिसके अंग उसके बस में नही - लेकिन दिमाग उसके काबू में है। वह वहीं व्हील चेयर पर बैठा है। उस पर हंसे नहीं, बल्कि हर जगह सीढ़ियों के स्थान पर चढ़ाई-उतराई के लिए रैंप बनवायें।

# समग्र स्वच्छता अभियान संदेश

1. खाना खाने के पहले हाथ धोयें।

2. शौच के बाद साबुन से हाथों को अवश्य धोयें।

3. शौच के लिए शौचालय में ही जायें।

4. घड़े में से पानी डंडी वाले लोटे से ही निकालें,
   पानी में उंगलियॉ नहीं डुबाना चाहियें।